# શ્રીયમુનાવિજ્ઞપ્તિઃ

shrIyamunAvijnaptiH

sanskritdocuments.org

March 17, 2018

shrIyamunAvijnaptiH

# શ્રીયમુનાવિજ્ઞપ્તિઃ

## Sanskrit Document Information

Text title : yamunAvijnaptiH

File name : yamunAvijnaptiH.itx

Category : devii, nadI, puShTimArgIya, haridAsa

Location : doc_devii

Author : haridAsa

Proofread by : PSA Easwaran psawaswaran at gmail.com

Description/comments : puShTimArgIya stotraratnAkara

Latest update : February 28, 2018

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

March 17, 2018

*sanskritdocuments.org*

shrIyamunAvijnaptiH

# શ્રીયમુનાવિજ્ઞપ્તિઃ

કૃષ્ણાં કૃષ્ણસમાં કૃષ્ણ-રૂપાં કૃષ્ણરસાત્મિકામ્ ।
કૃષ્ણલીલામૃતજલાં કૃષ્ણસમ્બન્ધકારિણીમ્ ॥ ૧॥

કૃષ્ણપ્રિયાં કૃષ્ણમુખ્યરસસઙ્ગમદાયિનીમ્ ।
કૃષ્ણક્રીડાશ્રયાં કૃષ્ણપદવીપ્રાપિકામપિ ॥ ૨॥

કૃષ્ણસ્થિતાં કૃષ્ણવાસહૃદયાં કૃષ્ણકામુકામ્ ।
કૃષ્ણપ્રિયાપ્રિયાં કૃષ્ણસ્થાયિભાવસમુદ્ભવામ્ ॥ ૩॥

કૃષ્ણૈકમિલનસ્થાનભૂતાં કૃષ્ણસુખાર્થિનીમ્ ।
કૃષ્ણગોપીસહચરીં કૃષ્ણસન્માનવર્ધિનીમ્ ॥ ૪॥

કૃષ્ણકાર્યપરીં કૃષ્ણલીલાસ્થલવિશોધિકામ્ ।
કૃષ્ણક્રીડાકુઙ્કુમાદિયુતાં કૃષ્ણરસાન્તરામ્ ॥ ૫॥

કૃષ્ણગોપીપૂજ્યદેવીં કૃષ્ણવ્રતફલપ્રદામ્ ।
કૃષ્ણલીલાર્થમાયાન્તીં કૃષ્ણનીરધિસઙ્ગતામ્ ॥ ૬॥

કૃષ્ણપાદસ્પર્શકામાં કૃષ્ણમાનસસંશ્રિતામ્ ।
કૃષ્ણાસક્તાં કૃષ્ણભક્તકૃષ્ણપ્રીતિપ્રસાધિનીમ્ ॥ ૭॥

કૃષ્ણાઙ્ઘ્રિરેણુબહુલાં કૃષ્ણસેવકસન્મુખામ્ ।
કૃષ્ણભાવાવિરોધિસ્વદાસપ્રકૃતિનાશિનીમ્ ॥ ૮॥

નમામિ યમુનાં કૃષ્ણતુર્યપ્રિયતમામહમ્ ।
નિજાચાર્યપદામ્ભોજદાસે ભાવં પ્રયચ્છતુ ॥ ૯॥

ઇતિ શ્રીહરિદાસોદિતા શ્રીયમુનાવિજ્ઞક્તિઃ સમાપ્તા ।

Proofread by PSA Easwaran psaeaswaran at gmail.com

*shrIyamunAvijnaptiH*

pdf was typeset on March 17, 2018

Please send corrections to *sanskrit@cheerful.com*